National Journal of Hindi & Sanskrit Research

**ISSN: 2454-9177**
**NJHSR 2025;** 1(63): 236-238
© 2025 NJHSR
www.sanskritarticle.com

**Josimuddin Seikh**
Research Scholar,
Dept. of Sahitya,
National Sanskrit University,
Tirupati (A.P.) 517507

**Correspondence:**
**Josimuddin Seikh**
Research Scholar,
Dept. of Sahitya,
National Sanskrit University,
Tirupati (A.P.) 517507

# महाभारते मुख्ययोः लिङ्गगत-असामान्यवपुर्मानुषयोः सामान्याध्ययनम्

**Josimuddin Seikh**

**सारांशः-**

पृथिव्याः अंशभूताः मानुषाः वैचित्रयुक्ताः। यथा तेषां शारिरिकवैविध्यं तथैव मानसिकम्। तत् केवलम् अद्य दृश्यते एवं न, तत् प्राचीनकाले अपि आसीत्। त्रिकालज्ञाः कवयः तेषां रचनायैः एवं विषयं ज्ञापयन्ति। विविधेषु ग्रन्थेषु तस्य उपस्थितिः परिलक्ष्यते। एतादृशः एकः ग्रन्थः वर्तते महाभारतं यत्र भिन्नं भिन्नं मनुष्यशारीरं दृश्यते। अस्मिन् शोधलेखे द्वयोः लिङ्गगत-असामान्यवपुर्मानुषयोः आलोचना कृता। तयोः सामान्यपरिचयः, देहे असामान्यता, कर्मजीवनं, भूमिका इत्यादयः विषयाः अत्र अवधानपूर्वकं विवर्णिताः। एतत् अध्ययनं दर्शयति यत् तत्समाजस्थ-लिङ्गगत-असामान्यवपुर्मानुषैः सह वर्तमानकालस्थ-लिङ्गगत-असामान्यवपुर्मानुषाणां सादृश्यं विद्यते न वा। पुनश्च शरीरविज्ञानक्षेत्रे तात्कालिकसमाजस्य धारणापि अनेन लभ्यते।

**भूमिका-**

महाभारतं महद्ज्ञानरत्नागारम्। एतत् वचनं प्रचलितं सत्यमपि यत् यद्यद् महाभारते प्राप्यते तत्तत् अन्यत्र दृश्यते। पुनश्च यत् महाभारते नास्ति तत् अन्यत्रापि नास्ति। **'यदिहास्ति तदन्यत्र यन्नेहास्ति न तत्क्वचित्'**।[1] अतः एतस्मिन् विषये संशयः न भवेत् यत् यथा साम्प्रतम् अस्माकं समाजे तृतीयाप्रकृतियुक्तः मानुषः परिवर्तितलिङ्गः मानुषः च दृष्यते तथैव महाभारते नाम तात्कालिकसमाजे विद्यमानः आसीत्।

**बीजशब्दाः-** लिङ्गम्, षण्डः, प्रकृतिः. सामान्यम्, असामान्यम्, वपुः, मानुषः

**बृहन्नला-**

बृहन्नला महाभारते एकं रोचकं पात्रम् अस्ति। महाभारतस्य विराट्पर्वणि अस्य उल्लेखः वर्तते। सः स्वरुपतः आसीत् अर्जुनः, एकः पाण्डवः।

यदा पाण्डवानां द्वादशवर्षाणि यावत् वनवासः समाप्तः प्रतिज्ञानुसारम् एकवर्षं यावत् गुप्तरूपेण वासः आरब्धः च तदा द्रौपदीसहिताः पाण्डवाः स्वपरिचयम् अप्रकाश्य मत्स्यदेशे विराटराजस्य शरणं गतवन्तः।[2]

अस्मिन् समये युधिष्ठिरादयः पाण्डवाः पृथक्परिचयं धृतवन्तः। युधिष्ठिरः यदा अर्जुनं पृष्ठवान् यत् सः केन वेषेण कथञ्च तत्र विराटराजसभायां स्थास्यति तदा तेन उक्तम्-

**प्रतिज्ञां षण्ढकोऽस्मीति करिष्यामि महीपते।**
**ज्याघातौ हि महान्ती मे संवर्तुं नृप दुष्करौ।।**
**वलयैश्छादयिष्यामि वाहू किणकृताविमौ।**
**कर्णयोः प्रतिमुच्याहं कुण्डले ज्वलनप्रभे।।**
**पिनद्धकम्वुः पाणिभ्यां तृतीयां प्रकृतिं गतः।**
**वेणीकृतशिरा राजन् नाम्ना चैव बृहन्नला।।**[3]

यथा वचनं तथा कर्म इति अर्जुनः तद्वेषं धृत्वा विराटराजसभां प्रविष्टः।

अर्जुनः परिस्थितेः अनुसारं नपुंसकस्त्रीरूपेण वेषं धारयति स्म। किन्तु क्लीबः इत्यस्य कारणं, सः एकदा उर्वश्या शापप्राप्तः आसीत्। अर्जुनः इन्द्रस्य नृत्यगायनकार्यक्रमे एकदा उर्वश्याः उपस्थापनम् अतीव प्रीत्या

पश्यन्नासीत्। तद्वचनं ज्ञात्वा उर्वशी मन्यते स्म यत् एषः महावीरः तस्याः सङ्गतिम् ऐच्छत्। अतः रात्रौ अर्जुनस्य समीपम् आगत्य स्वकामनापूर्तये प्रार्थितवती।[4] किन्तु तेन उर्वश्याः प्रस्तावं नाङ्गीकृतम्।

**दुःश्रुतं मेऽस्तु सुभगे यन्मां वदसि भाविनि।**
**गुरुदारैः समाना मे निश्चयेन वरानने।।**
**यथा कुन्ती महाभागा यथेन्द्राणी शची मम।**
**तथा त्वमपि कल्याणी नात्र कार्या विचारणा।।**[5]

तदा उर्वशी तं शापं दत्तवती यत् तस्याः कामनां न पूरयति चेत् स्त्रीषू क्लीबत्वं प्राप्स्यति इति।

**एवमुक्ता तु पार्थेन उर्वशी क्रोधमूर्च्छिता।**
**वेपन्ती भ्रुकुटीवक्रा शशापाथ धनंजयम्।।**
**तव पित्राभ्यनुज्ञातां स्वयं च गृहमागताम्।**
**यस्मान्मां नाभिनन्देथाः कामबाणवशंगताम्।।**
**तस्मात् त्वं नर्तनः पार्थ स्त्रीमध्ये मानवर्जितः।**
**अपुमानिति विख्यातः षण्ढवद् विचरिष्यसि।।**[6]

अत एव अज्ञातकालयापने तस्य समस्या नाभवत्।[7] वस्तुतः उर्वश्याः शापः अर्जुनस्य कृते आशीर्वादः एव अभवत्। तस्य नपुंसकवेषः एकवर्षपर्यन्तं स्वपरिचयं लोपयितुं विराटराजस्य शरणं प्राप्तुं च अनुकूलः अभवत्।

**तेन नर्तनवेषेण अपुंस्त्वेन तथैव च।**
**वर्षमेकं विहृत्यैव ततः पुंस्त्वमवाप्स्यसि।।**[8]

बृहन्नलावेषेण अर्जुनः विराटराजस्य प्रासादे राजकुमार्याः उत्तरायाः सङ्गीतनृत्यशीक्षिकारूपेण अवसरं प्राप्तवान्। अर्जुनस्य मूलपरिचयं ज्ञात्वा विराटराजः उत्तरा इति स्वकन्यां तस्मै समर्पयितुम् इच्छति स्म।[9] तदा अर्जुनः कन्यासमां शिष्यां स्वभार्यारूपेण न स्वीकृतवान्। सः स्वपुत्रेण अभिमन्युना सह उत्तरायाः विवाहं सम्पादयति स्म।[10]

अर्जुनस्य जीवने वर्षपर्यन्तं बृहन्नलारूपेण अवस्थानम् असामान्यव-पुर्मानुषः इत्यस्य अतीव महत्त्वं भजते। सङ्गीतस्य नृत्यस्य च सुज्ञाम् अर्जुनस्य चरित्राय उन्नतस्थानमयचछत्। तथा च महाराजकुमार्याः उत्तरायाः गर्भे परीक्षितस्य जन्मना पाण्डवकुलस्य गतिः सचला जाता।

**शिखण्डी-**

महाभारते एका विशिष्टा व्यक्तिः अस्ति शिखण्डी। सा द्रुपदराजस्य पुत्री आसीत्।

**'द्रुपदस्य सुता राजन् राज्ञो जाता शिखण्डिनी'।**[11]

तस्याः एकस्मिन् एव शरीरे भिन्नसमये लिङ्गद्वयं जातम्। अर्थात् अस्याः जन्म स्त्रीरूपेण तु यौवने एकस्मिन् समये सा पुरुषरूपं स्वीकृतवती।

**'तस्या निमित्ते कस्मिंश्चित् प्रादात् पुरुषलक्षणम्'।।**[12]

पूर्वजन्मनि एषा काशीराजस्य कन्या आसीत्। भीष्मः भ्रात्रा विचित्रवीर्येण सह विवाहं कारयितुं काशीराजस्य कन्यात्रयं स्वयम्वरसभातः आनीतवान्।[13] तासां ज्येष्ठा अम्बा। यदा सा शाल्वराजं विवाहस्य इच्छां प्रकटयति स्म तदा भीष्मः तां तस्य समीपं प्रेषितवान्। राज्ञा तु सा तिरस्कृता भीष्मं प्रत्यागत्य अस्वीकृता अपमानिता च अभवत्।

**गच्छ भद्रे पुनस्तत्र सकाशं भीष्मकस्य वै।**
**नाहमिच्छामि भीष्मेण गृहीतां त्वां प्रसह्य वै।।**[14]

तस्मात् अम्बा भीष्मवधस्य कारणं भविष्यति इति विचिन्त्य वने तपः आरब्धवती। यदा तपसा प्रसन्नः महादेवः प्रादुर्भूतः तदा अम्बा भीष्मवधस्य वरं प्रार्थितवती। सा कन्यारूपेण पुनर्जन्म प्राप्स्यति, कालानन्तरं पुरुषरूपं प्राप्स्यति इति शिवः तस्याः प्रार्थनां पूरितवान्।[15] तदा अम्बा यमुनातटे चिताप्रज्वालनेन शरीरत्यागं कृतवती।[16]

अपुत्रः द्रुपदराजः पुत्रेष्टियज्ञं कृत्वा महादेवतः वरं प्राप्तवान् यत् प्रथमं कन्याजन्म भविष्यति पश्चात् पुत्ररूपं प्राप्स्यति इति।

**भगवन् पुत्रमिच्छामि भीष्मं प्रतिचिकीर्षया।**
**इत्युक्तो देवदेवेन स्त्रीपुमांस्ते भविष्यति।।**
**कन्यां प्रवररूपां तु प्राजायत नराधिप।**
**अपुत्रस्य तु राज्ञः सा द्रुपदस्य मनस्विनी।।**[17]

यदा द्रुपदस्य कन्या जाता तदा कन्यास्थाने तस्य पुत्रो जातः इति उद्घोषितम्। तस्य नाम शिखण्डी इति कृतम्- **"ख्यापयामास राजेन्द्र पुत्रो ह्येष ममेति वै।...पुंवद्विधानयुक्तानि शिखण्डीति च तां विदुः।।"**[18]

शिखण्डी इत्यस्य विवाहः दशार्णराजस्य हिरण्यवर्मणः पुत्र्या सह अभवत्। किन्तु किञ्चित्कालानन्तरं कन्या भर्तुः शारीरिकावस्थां ज्ञात्वा पितरम् उक्तवती। तदा क्रुद्धः सन् द्रुपदराजेन सह युद्धाय सज्जतां कृतवान्।[19] सा द्रुपदसुता चिन्तितवती यत् तस्याः कारणादेव पितरौ एतादृशक्लेशप्राप्तौ आस्ताम्। अतः सा दुःखेन आत्महत्यां कर्तुं वनम् अगच्छत्।[20] तत्र सा एकेन स्थुनाकर्णनाम्ना यक्षेण सह मिलितवती। शिखण्डिनः समस्यां श्रुत्वा सः स्वपौरुषं शिखण्डिने दत्तवान् एकेन प्रतिज्ञावचनग्रहणेन यत् सा युद्धे पितरौ साहाय्यं कृत्वैव स्वपौरुषं प्रतिदास्यति इति।[21]

किञ्चित्कालादनन्तरं कुबेरः स्थुनाकर्णस्य गृहम् आगत्य तं स्त्रीरूपेण दृष्ट्वा अस्य कारणं पृष्टवान्। तदा सर्वं ज्ञात्वा क्रोधेन शापं दत्तवान् यत् सः सर्वदा स्त्रीरूपेणैव भविष्यति अपरतः शिखण्डिनी पुरुषरूपेण स्थास्यति च इति।

**तं शशापाथ संक्रुद्धो धनदः कुरुनन्दन।**
**एवमेव भवत्वद्य स्त्रीत्वं पापस्य गुह्यकाः॥**
**ततोऽब्रवीद् यक्षपतिर्महात्मा**
**यस्माददास्त्ववमन्येह यक्षान्।**
**शिखण्डिने लक्षणं पापबुद्धे**
**स्त्रीलक्षणं चाग्रहीः पापकर्मन्॥**
**अप्रवृत्तं सुदुर्बुद्धे यस्मादेतत् त्वया कृतम्।**
**तस्मादद्य प्रभृत्येव स्त्री त्वं सा पुरुषस्तथा।।**[22]

शिखण्डिनी पुरुषरूपं प्राप्य महावीरः अभवत्। कुरुक्षेत्रयुद्धस्य परिणामरचनायाम् एका महत्त्वपूर्णा घटना अस्ति महावीरभीष्मस्य पतनम्। तथा च एषा घटना अभवत् लिङ्गगत-असामान्यवपुर्मानुषेण।

भीष्मः ज्ञापितवान् यत् कदापि नार्या, क्लीबेन, स्त्रीतः पुरुषरूपजातेन अशस्त्रेण च सह युद्धं कर्तुं तस्य इच्छा नास्ति इति। पुनश्च तेन तं हन्तुमुपायं सूचितवान्।[23] तदनुसारं युद्धस्य दशमे दिने पाण्डवानां सहायेन शिखण्डी प्रतिशोधार्थं भीष्मं प्रति बाणान् क्षीप्तवान्।[24] उत्तरायणस्य सूर्यालोके पितृदत्तेन वरेण स्वस्य इच्छया भीष्मः मृत्युं गृहीतवान्।[25]

एवं प्रकारेण असामान्यवपुः शिखण्डी महाभारतस्य मुख्यपात्रेषु आत्मप्रकाशं कृतवान्निति।

**उपसंहारः-**

तौ एतादृश-असामान्यशरीरं प्राप्यापि समाजे क्लेशं नानुभवतः स्म। कारणं तौ तयोः शरीरस्य परिवर्तनम् उपयोगाय कल्पितवन्तौ। तौ सदा आत्मकर्मणि स्थिरौ आस्ताम्। तयोः कर्म एवम् आसीत् येन तौ महाभारते विशेषस्थानम् अधिकृतवन्तौ। एवमपि वक्तुं शक्यते यत् एतत् चरित्रद्वयं विना प्राचीनं इतिहासः साहित्यं च कदाचित् अन्यस्रोतसि प्रवाहितौ अभविष्यताम्।

**सन्दर्भसूची-**


1. श्रीमन्महर्षि वेदव्यासप्रणीत महाभारत (सचित्र, सरल हिन्दी-अनुवाद)
   अनुवादक- साहित्याचार्य पण्डित रामनारायणदत्त शास्त्री पाण्डेय 'राम' प्रकाशक एवं मुद्रक- गीताप्रेस, गोरखपुर---273005
   (गोबिन्दभवन-कार्यालय,कोलकाता का संस्थान)
2. महामुनिश्रीमदीश्वरकृष्णविरचिता सांख्यकारिका
   प्रकाशक- चौखाम्बा विद्याभवन, चौक(बनारस स्टेट बैङ्क के पिछे) पो. बा. नं. 1069, वाराणसी 221001
3. श्रीमदमरसिंहप्रणीतः अमरकोशः-
   श्रीमन्नालाल अभिमन्यु एम. ए. इत्यनेन विरचितया धराख्य हिन्दी-टीकया सम्वलितः, काशीस्थ 'संस्कृतवुकडिपो' इत्यस्याधिपैः मास्टर खेलाडीलाल एण्ड सन्स इत्यतैः श्रीसीताराम मुद्रणालये मुद्रापयित्वा प्रकाशितम्।
4. Abnormal Psychology
   Jill M. Hooley, James N. Butcher, Matthew K. Nock, Susan Mineka, Published by Pearson India Education Services Pvt. Ltd, CIN: U72200TN2005PTC057128. Head Office: 1st Floor, Berger Tower, Plot No. C-001A/2, Sector 16B, Noida - 201 301, Uttar Pradesh, India.
5. The Disability Studies Reader (4th Edition)
   By Lennard J. Davis. Published by Routledge, Taylor & Francis Group NEW YORK AND LONDON


**पाद टिप्पणीः -**

1 महा. स्वर्गारोहण. ५. श्लो-५०
2 महा. विराट. १. श्लो- ८-११
3 तत्रैव २. श्लो- २५-२७
4 तत्रैव वन. ४६. श्लो- ५, १६, २१-२२, ३१-३५
5 महा. वन. ४६. श्लो- ३७-३८
6 तत्रैव श्लो- ४८-५०
7 तत्रैव विराट. ११. श्लो- ११-१२
8 तत्रैव वन. ४६. श्लो- ५९
9 तत्रैव विराट. ७१. श्लो- ३४
10 तत्रैव ७२. श्लो- ९, २०
11 महा. उद्योग. १९२. श्लो- ४०
12 तत्रैव
13 तत्रैव १७३. श्लो- ७-११, २२
14 तत्रैव १७५. श्लो- ६
15 महा. उद्योग. १८७. श्लो- १५
16 तत्रैव श्लो- १७-१९
17 तत्रैव १८८. श्लो- ५, १४
18 तत्रैव श्लो- १५-१९
19 तत्रैव १८९. श्लो- ७-२३
20 तत्रैव १९१. श्लो- १८-१९
21 तत्रैव १९२. श्लो- ५-६
22 महा. उद्योग. १९२. श्लो- ४५-४७
23 तत्रैव भीष्म. १०७. श्लो- ७७-८८
24 तत्रैव १०८. श्लो- ४०-४३
25 तत्रैव ११९. श्लो- ९७-११०